International Journal of Sanskrit Research 2021; 7(3): 100-103

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(3): 100-103
© 2021 IJSR
www.anantaajournal.com
Received: 09-03-2021
Accepted: 17-04-2021

**Dr. Muralisham H**
Assistant Professor, Sri Sathya Sai University for Human Excellence, Kalburgi, Navanihal, Karnataka, India

**Corresponding Author:**
**Dr. Muralisham H**
Assistant Professor, Sri Sathya Sai University for Human Excellence, Kalburgi, Navanihal, Karnataka, India

# ।। ज्यौतिष-शास्त्रीय फलादेशे शब्दशक्तीनां प्रयोगः।।

**Dr. Muralisham H**

## प्रस्तावना

फलितज्यौतिषम् तु लोकव्यवहारत्मकम् शास्त्रम्। ग्रहाणां चलनवशात् जनैः लोकव्यवहाराय कर्मफलप्रवचनमेव अस्य शास्त्रस्य प्रयोजनम्। तदानीं शुभाशुभफलप्रवचनवेलायां जनमनसि दुःखनिवारणाय आचार्यैः शब्दानां बहुसूक्ष्मतया प्रयुक्ताः सन्ति । प्राचीनैः शब्दानां शक्तीनां जनमनसि तस्य प्रभावः परिगणय्य शब्दानाम् प्रयोगः कृतः। अत्र काव्यस्य को वा सम्बन्धः?

काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥ [1]

फलितज्यौतिषशास्त्रमपि यशसे, अर्थकृते, व्यवहारविधे, शिवतरक्षतये, कान्तासम्मिततयोपदेशयुजे च भवति। तस्मात् काव्यवद् अत्रापि सुष्टु फलादेशो विधेयः। अद्यत्वे अपि वाग्भूषणेन सहृदयस्य आह्लादम् यत्र प्राप्स्यते तत्रैव रोचते जनानां मनः। आचार्यैः वराहमिहिरादिभिः अपि शब्दानां जागरूकतया प्रयोगाः कृताः। शब्दाः क्वचित् अभिधायाः क्वचित् लक्षणे क्वचित् व्यञ्ज्ञे वा प्रयुक्तः। फलप्रवचने अपि सुन्दरतया फलादेशः करणीयः। तस्मिन् विचारे अत्र प्रकाशः कर्तुम् आयासो कृतः। शब्दस्य तिस्त्रः शक्तयः। अभिधा लक्षणा व्यञ्जना चेति।

स मुख्यार्थस्तत्र मुख्यो व्यापारस्याभिधोच्यते। [2]

अभिधा तु सर्वत्र फलादेशे दृश्यते एव । अभिधा शक्तिः साक्षात् सङ्केतितम् अर्थम् बोधयति। तस्मिन् केचन रूढाः, केचन यौगिकाः, केचन योगारूढाः। अत्र शक्तिस्त्रिधा । रूढियोगो योगरूढिश्च।

**लक्षणाशक्तिः-**

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्। अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ।।[3]

अत्र आचार्याणां मतानुसारं लक्षणाशक्तिः भवितुं त्रयः अंशाः ध्येयाः। ते मुख्यार्थबाधः, मुख्यार्थसम्बद्धः अर्थः, रूढिः प्रयोजनविशेषो वा कारणम्।
लक्षणा शक्तिः दृश्यते यथा भट्टनारयणेन कृत चमत्कारचिन्तामणि नामके ग्रन्थे लग्नस्थे रवौ इत्थं फलं कथितम्। यथा-

तनुस्थो रविः तुङ्गयष्टिं विधत्ते मनः सन्तपेत् दारदायादिवर्गात् ।
वपुः पीड्यते वातपित्तेन नित्यं स वै पर्यटन् ह्रासवृद्धिं प्रयाति ॥[4]

अत्र लग्नस्थे रवौ ह्रासवृद्धिं प्रयाति इति वाक्ये किं ह्रासवृद्धिं प्रयाति इति न कथितम्। मुख्यार्थबाधे अर्थात् धनं सम्पदादयः ह्रासवृद्धिं प्रयाति इति अवगन्तव्यम्। रूढौ पर्यटनेन धनं सम्पदादयः ह्रासवृद्धिं इति अर्थः अत्र लक्षणाशक्त्या जायते।
मम्मटेन लक्षणायाः षड्भेदाः प्रतिपादिताः। आदौ लक्षणा द्विविधा शुद्धा गौणी चेति। शुद्धा द्विविधा उपादानलक्षणा, लक्षणालक्षणा चेति। तद्यथा-

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् । उपादानं लक्षणं चेत्युक्ता शुद्धैव स द्विधा।।[5]

**उपादानलक्षणा-** स्वसिद्धये परस्य आक्षेपणं यत्र भवति तत्र उपादान लक्षणा। रूढौ उपादानलक्षणा एवं भवति श्वेतो धावति। अत्र श्वेतः इति शब्दः श्वेतगुणविशिष्टम् अश्वं सूचयति। अत्र रूढिः एव कारणम्।

एवं च परार्थं स्वस्य अर्पणं भवति तत्र लक्षणा लक्षणा। ते अपि द्विविधा सारोपा साध्यवसाना चेति। कथितं च-

सारोपान्यातु यत्रोक्तौ विषयी विषयस्तथा विषय्यन्तः कृते अन्यस्मिन् सा स्यात् साध्यावसानिका।।[6]

**प्रयोजनवती लक्षणा-** सप्तमराशिस्थे चन्द्रे प्रयोजनवती लक्षणायां कथितम् यथा-

ददेद् दारशं सप्तमे शीतरश्मिः धनित्वं भवेदध्ववाणिज्यतोऽपि।
रतिं स्त्रीजने मिष्टभुक् लुब्धचेताः कृशः कृष्णपक्षे विपक्षाभिभूतः।।[7]

अस्मिन् श्लोके अध्ववाणिज्यतः धनित्वम् भवेत्। अध्वेन इति शब्दस्य मार्गः इति न। अध्वशब्दस्य इतरदेशेषु वाणिज्यतः इति। एवं प्रयोजनवती लक्षणा।

**सारोपलक्षणा।–** यत्र विषयोनिगीर्णो अन्येन सह तादात्म्यं स्थापयति तत्र सारोपा लक्षणा। तृतीये कुजे मति विक्रमवान्[8] इति बृहज्जातके कथितः। अत्र विक्रमवान् गुणः समरे दृश्यते। परन्तु मतौ विक्रमवान् अर्थात् श्रेष्ठः मतिः इति । अत्र सारोप लक्षणा भवितुमर्हति।

**शुद्धा लक्षणा-यत्र सादृश्य भिन्नकारणेन लक्षणा सा शुद्धा।**

यदा भूसुतः संभवेत् तुर्यभावे तदा किं ग्रहाः सानुकूला जनानाम्।
सुहृद् वर्गसौख्यं न किञ्चित् विचिन्त्यं कृपावस्त्रभूमीः लभेद् भूमिपालात्।।[9]

भूमिपालात् सदैव कृपा न स्यात्,अपि च साम्प्रतं भूपाः एव न सन्ति। एवं भूमिपालात् कृपा लभेत् इति वाक्यस्य बाधा जयते। भूमिपालात् इति शब्दस्य प्रशासकाः प्रसीदाः भवन्ति इति अर्थः। तस्मात् शुद्धा लक्षणा।

**शुद्धा सारोपा** – यत्र सादृश्यभिन्ना सा शुद्धा। जातकः एव गणस्य भूमिनाथः इति प्रयोगः।

चतुर्थे चरेत् चन्द्रचारू मित्रो विशेषाधिकृद् भूमिनाथो गणस्य।।
भवेल्लेखको लिख्यते वा तदुक्तं तदाशापरः पैतृकं नो धनं च।।[10]

**गौणी सारोपा** –या सादृश्यमूला स गौणी। दशमस्थे बुधे चमत्कारचिन्तामणौ इत्थम् वर्णितम् यथा-

मितं संवदेन्नो मितं संलभेत् प्रसादादिवैकारि सौराजवृत्तिः।
बुधे कर्मगे पूजनीयो विशेषात् पितुः संपदो नीतिदण्डाधिकारात्।।[11]

अत्र विशेषात् पूजनीयः इति शब्दः। सौराजवृत्तिः इत्यादि गौणी सारोपा भवति।
यत्र विषयो विषयिणो निगीर्यते एकात्मतां वा गच्छति तत्र साध्यवसाना लक्षणा। यथा गौ अयम् गौ जल्पति वा। अत्र गो शब्देन गोवाहीकः पुरुषः लक्षितः। सा द्विविधा। गौणी साध्यवसाना, शुद्धा साध्यवसाना चेति।

**गौणी साध्यवसाना – बलवान् शत्रुजितश्च शत्रुजाते।** यदि षष्ठस्थाने कुजे जाते शत्रुजितः अयमेव इति वराहमिहिराचार्यस्य मतम्।

**शुद्धा साध्यवसाना** –

गुरुत्वं गुणैर्लग्नगे देवपूज्ये सुवेशी सुखी दिव्यदेह अल्पवीर्यः।
गतिर्भाविनी पारलोकी विचिन्त्या वसूनि व्ययं संबलेन व्रजन्ति।।[12]
अयमेव देवपूज्यः इत्यत्र शुद्धासाध्यवसाना लक्षणा वर्तते।

वाच्ये विधिरूपः प्रतिषेधः व्यञ्जनम् । अभिधालक्षणशक्त्योः कार्येऽवसिते यया अन्या अर्थो बोध्यते सा व्यञ्जना नाम। व्यञ्जना निगूढम् अर्थम् बोधयति । यथा गङ्गायां घोषः। गङ्गातीरो अत्र गूढार्थः।
लग्नात् अष्टमस्थे चन्द्रे चमत्कारचिन्तामणौ एवं विद्यते यथा-

सभा विद्यते भैषजे तस्य गेहे पचेत् कर्हिचित् क्वाथमुद्गोदकानि।
महाव्याधयो भीतयो वारिभूताः शशीक्लेषकृत् सङ्कटान्यष्टमस्थाः।।[13]

अत्र आचार्यः जातकस्य फलादेशः बहुमनोहरतया वर्णयति यथा यस्य अष्टमस्थे चन्द्रमसः, तस्य गेहे भैषजानां सभा विद्यते, वारिभूताः महाव्याधयो भीताः भवन्ति इति। परन्तु अस्य साक्षात् अर्थः न स्वीकरणीयः। अत्र तस्मै महाव्याधिषु महाव्याधिः भवेत्, वैद्याः अस्य ओषधोपचारचिन्तायां वैद्यसभा विद्यते जातकः रोगी इति भावः। वाच्यप्रतिषेधो भूय व्यञ्जनम् भवति।
व्यञ्जनाशक्ति द्विविधा। अभिधा मूला लक्षणा मूला च । यत्र अनेकार्थः शब्दः संयोगवियोगादिकारणेन एकत्रार्थे नियन्त्रिते सति अन्यमर्थं बोधयति सा अभिधामूला व्यञ्जना।

**लक्षणामूला व्यञ्जना-** यत्र लक्ष्यार्थम् आदाय तदन्यत् किञ्चित् बोध्यते सा लक्षणामूला व्यञ्जना। उदाहरणार्थम् गङ्गायाम् घोषः। अत्र गङ्गाशब्देन लक्ष्यः शीतत्वपावनत्वादयः।

सूर्यसिद्धान्ते – अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने
समस्तजगताधारमूर्तये ब्रह्मणे नमः।।

चमत्कारजनके श्लोकेऽस्मिन् ब्रह्मणः चिन्तनम् कृतम्। परन्तु तावत् बीजगणितम् अपि उक्तम्। यथा अचिन्त्या नाम चिन्तयितुम् अयोग्यम् अस्ति बीजगणितम्। समस्तजगताधारमूर्तिः गणितम् इति च।

**अभिधा मूलाव्यञ्जना–** शाब्दी आर्थी च। यत्र शब्दमूला सा शाब्दी यत्रार्थमूला सा अर्थी।
रूढिमूला व्यञ्जना –व्यङ्ग्येन सहिता रूढौ सहिता तु प्रयोजने। [14]

विलग्ने कुजे दण्डलोहाग्निभीतिः तपेन् मानसं केसरी किं द्वितीयः।
कलत्रादिघातःशिरोनेत्रपीडा विपाकेफलानां सदैवोपसर्गः।। [15]

कर्मणि द्वितीयो केसरी इव भाति इति। अत्र केसरी शब्दः वाच्यार्थे नास्ति। परन्तु रूढि अर्थे प्रयोगः कृतः। केसरी इव कार्यं करोति इति अर्थः। तस्मात् रूढिमूला व्यञ्जना जायते।
उपसंहार- एवम् शब्दशक्तयः ज्यौतिषशास्त्रफलादेशग्रन्थेषु मया अवलोकितः। तेषाम् उपयोगेन जनमनसि स्पष्टतया विशिष्टफलादेशः प्राचीनैः कृतः, अद्यापि तेषाम् उपयोगेन यशः अर्थः सद्यपरनिवृतेः प्राप्तिः जायेत। इति शम्।

## सन्दर्भग्रन्थ

1. काव्यप्रकाशः -
2. काव्यप्रकाशः - 2-8
3. काव्यप्रकाशः - 2-9
4. चमत्कारचिन्तामणिः सूर्यविचारः - 1
5. साहित्य दर्पण -2 5
6. काव्य प्रकाशः 2-11
7. चमत्कारचिन्तामणिः चन्द्रविचारः - 7
8. बृहज्जातकम्- 20 - 2
9. चमत्कारचिन्तामणिः मङ्गलविचारः- 4
10. चमत्कारचिन्तामणिः चन्द्रविचारः - 4
11. चमत्कारचिन्तामणिः बुधविचारः - 10
12. चमत्कारचिन्तामणिः गुरुविचारः - 1
13. चमत्कारचिन्तामणिः चन्द्रविचारः - 8
14. काव्यप्रकाशः 2 - 18 सूत्रम्
15. चमत्कारचिन्तामणिः मङ्गलविचारः – 1

## सन्दर्भग्रन्थ सूची


1. साहित्यदर्पणम् (चन्द्रकला संस्कृतहिन्दीव्याख्योपेतम्) चौखम्बा संस्कृत संस्थान। वाराणसी।
2. काव्यप्रकाशः झलकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्या टीकया समन्वितः चौखम्बा संस्कृत प्रतिष्ठान दिल्ली
3. चमत्कारचिन्तामणिः –भट्टनारायणकृतः चमत्कारचिन्तामणिः मोतीलाल बनारसीदास दिल्ली ।2008
4. बृहज्जातकम् –चौखम्बा संस्कृत संस्थान। वाराणसी। चौखम्बा संस्कृत संस्थान। वाराणसी।
5. सूर्यसिद्धान्तः-कपिलेश्वरशास्त्री। चौखम्बा संस्कृत संस्थान। वाराणसी।